| SRI BHAGAWAN MAHAVEER JAIN COLLEGE<br>Vishweshwarapuram, Bangalore.<br><br>**MOCK QUESTION PAPER-2** | **Course:** | II PUC |
|---|---|---|
| | **Subject:** | Sanskrit |
| | **Max. Marks:** | 100 |
| | **Duration:** | 3:00Hrs. |

**। एकवाक्येन संस्कृत भाषया उत्तरं लिखत ।** **1 x 10 = 10**

१. विश्वस्य मातरः काः?

२. परदुःखेन के अत्यन्तदुःखिनः भवन्ति ?

३. के निर्विमर्शाः?

४. मृगपोतकस्य नाम किम्?

५. राणाप्रतापः कस्मिन् ग्रामे अजायत?

६. पुण्डरीकस्य पितुः नाम किम्?

७. सा शान्तिः कस्मात् सङ्कलितः?

८. कर्णस्य रक्षाकवचं किम्?

९. कथं अर्थान् चिन्तयेत्?

१०. ध्वन्यालोकः कन्नडभाषायां केन अनूदितः?

**॥ द्वित्रः वाक्यैः संस्कृत भाषया, कन्नडभाषया आङ्गलभाषया वा उत्तरं लिखत– (पञ्चनामेव)** **2 x 5 = 10**

११. पुराणभारते उल्लिखितानि द्वीपानि कानि?

१२. नगरवासिभिः जनैः राक्षसः किम् उक्तः?

१३. राजपुत्रः मञ्जूषां प्राप्य किं करोति?

१४. कालिदासस्य कृतीनां नामानि लिखत।

१५. पुण्डरीकस्य अनुरागं महाश्वेता कथं जानाति ?

१६. कर्णं प्रति परशुरामोपदेशं लिखत।

१७. कृष्णशास्त्रिणां कन्नड–साहित्यसेवा ।

**॥। त्रयाणां श्लोकानाम् अनुवादं कन्नड–आङ्गलभाषायां वा लिखत ।** **3 x 3 = 9**

१८. ज्ञेयं तद्भारतं वर्षं सर्वकर्मफलप्रदाम् ।
अत्र कर्माणि कुर्वन्ति त्रिविधानि तु नारद ॥

१९. पशवोऽपि हि जीवन्ति केवलं स्वोदरम्भराः ।
तस्यैव जीवितं श्लाघ्यं यः परार्थे हि जीवति ॥

२०. प्रातर्बुध्वा च तत्सर्वं जहास सकलो जनः ।
ननन्द स वणिक् सा च तत्सुता प्राप्तसत्पतिः ॥

२१. कास्विदवगुण्ठनवती नातिपरिस्फुट शरीरलावण्या ।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम् ॥

२२. कर्णः सुशीलेन बभूव शिष्यः प्रियो ममात्यन्तगुणी गुणज्ञः ।
तथाप्यसत्येन च भाषितेन प्राप्तो नु शापात्कृपणामवस्थाम् ॥

**IV). अधोलिखितवाक्यं कः कं प्रति अवदत्? इति संस्कृतभाषया लिखत – (चतुर्णामेव) ।** **2 x 4 = 8**

२३. अद्यप्रभृति मनुष्यभक्षणं परित्यज ।
२४. ससुतदारस्य क्षयः स्यात्तव निश्चितम् ।
२५. भवतु, अनिर्वर्णनीयम् परकलत्रम् ।
२६. पुण्डरीक इति नामचक्रे।
२७ अहो गुरुकुल लैभवम् ।
२८. परीक्षार्थम् इतोऽपि समयावकाशः विद्यते ?

**V). दशवाक्यैः कन्नडभाषया, आङ्गलभाषया लघु टिप्पणी लिखत– (पञ्चानामेव) ।** **5 x 5 =25**

२९. प्रवाजकः ।
३०. अभिज्ञान शाकुन्तलस्य पञ्चमोङ्कस्य सारं लिखत।
३१. महाराणाप्रतापेन अनुभूता कष्टपरम्परा ।
३२. पुण्डरीकस्य जन्मवृत्तान्तं लिखत।
३३. कर्णशाप प्रसङ्गः ।
३४. विद्यार्थिनां कृते कृष्णशास्त्रिणां सन्देशः ।
३५. शास्त्रिणां शिष्यवात्सल्यम्।

**VI). रिक्त स्थानं पूरयत** **4 x 1 = 4**

३६. द्वीपेषु सर्वेषु__________प्रयान्ति ।
३७. त्वम् आत्मनः_________ कुरु ।
३८. भृत्यैरानय्य सहसा________ उदघाटयत् ।
३९. भवादृशा गुरवः अतीव________ ।
(विरलाः, समीहितम्, कौतुकात्, नराः )

**VII संयोजयत– ।** **4 x 1 = 4**

४०.

| | |
|---|---|
| परिव्राड् | मञ्जूषा |
| शाङ्गर्रवः | ब्रह्मा |
| ऊर्ध्वस्थदीपिका | कण्वशिष्यः |
| प्रजापतिः | सन्यासि । |

**VIII प्रश्ननिर्माणं कुरुत–(त्रयाणमेव) ।** **3 x 1 = 3**

४१. अनुचराः प्रव्राजकस्य वचनम् अपालयत् ।
४२. कवि कुलगुरुः कालिदासः ।
४३. चिन्तातुराणां न सुखम् न निद्रा ।
४४. पुत्थलिका भोजराजं प्रति अब्रवीत् ।

**IX यथा निर्देशं कुरुत– (चतुर्णामेव) ।** **4 x 3 = 12**

४५. **सन्धिं विभजत अथवा योजयत (त्रयाणामेव)**
बाल्यादेव, तद्विरुद्धम्, तथा + इति, अद्य + अपि, हि +अकाले
४६. **विग्रहवाक्यं/समस्तपदं लिखत– (त्रयाणामेव)**
हिमवतः, दक्षिणम्, ज्ञानदाहः, जीवानां मारणम्, हिमवतः दक्षिणम्
४७. **लिङ्–विभक्ति–वचनानि लिखत ।(द्वयोरेव)**
पत्युः, तस्याम्, महाशयस्य, विद्या

४८. **लकार–पुरुष, वचनानि लिखत (द्वयोरेव)**
धारयति, अपनेष्यामि, भक्षय, पतेत

४९. **वाक्यदोषं परिहरत–**
भवान् गन्तुमर्हसि ।
अम्बा सह स्नातुं अभ्यागमम् ।

५०. **प्रयोगं परिवर्तयत–**
देवाः जन्म इच्छन्ति ।
अथवा
विक्रमादित्यः कालं नयति ।

५१. **अलङ्कारं सलक्षणं लिखत** –
मुखं भूमिगतं चन्द्रं मन्ये अथवा विलासमिव सरस्वत्याः ।

**X ५२. संस्कृतभाषया अनुवदत ।** **5 x 1 = 5**

ತಾರಕಾಸುರನನ್ನು ಸಂಹರಿಸಿದ ಕಾರ್ತಿಕೆಯನು ಶಿವನ ಕಿರಿಯ ಮಗ. ವಿಘ್ನನಿವಾರಕನಾದ ಗಣೇಶನು ಹಿರಿಯ ಮಗ. ಸಂಪತ್ತಿಗೆ ಅಧಿಪತಿಯಾದ ಕುಬೆರನು ಪರಮಮಿತ್ರ. ಜಗನ್ಮಾತೆಯಾದ ಪಾರ್ವತಿಯು ಮಡದಿ. ಮಾವನು ಪರ್ವತರಾಜ. ಅವನು ವಾಹನವು ನಂದಿ. ಅವನ ಸೇನಾಪ್ರಮುಖನು ವೀರಭದ್ರ. ಇಂತಹ ಕುಟುಂಬವನ್ನು ಹೊಂದಿದ್ದರೂ ಪರಶಿವನು ಭಿಕ್ಷಾಟನೆಯನ್ನು ಮಾಡುತ್ತಾನೆ. ಎಂತಹ ವಿಧಿವಿಪರ್ಯಾಸ.

Kartikeya, the destroyer of demon Taraka, is the younger son of Lord Shiva. Ganesha, the remover of obstacles is his elder son. Kubera, the Lord of wealth is his friend. Parvathi, the mother of Universe is his wife. Parvataraja, the king of mountains is his father-in-law. Nandi is his vehicle. Virabhadra is his chief of army. Inspite of all this Lord Shiva begs. What a destiny

**५३. कन्नडभाषया–आङ्ग्लभाषया वा अनुवदतः** **5 x 1 = 5**

पुस्तकानि सम्पर्कसाधनानि वर्तन्ते । बहून् विषयन् एकत्र संगृह्य सुचारुरुपेण निवेदयितुं पुस्तकमेव समर्थं माध्यमम् । पुस्तकमाध्यमेन शाश्वतरुपेण विचारविनिमयः कर्तुं शक्यते । यः पुस्तकानि अधिकं पठति सः अतीव बुद्धिमान् भवति । पूर्वं तालपत्रेषु भूर्जपत्रेषु च जनाः लिखन्ति स्म । मुद्रणयन्त्रस्य अन्वेषणानन्तरं पुस्तकप्रचारः अधिकः सञ्जातः ।

**XI इमं परिच्छेदं पठित्वा प्रशनामुत्तराणि लिखत ।** **1 x 5 = 5**

एकदा स्वातिनामकः मुनिः पिपासया पीडितोऽभवत् । जलमूलम् अन्विष्यता तेन कश्चन आह्लादकरः शब्दः श्रुतः । तम् अनुसृत्य स अग्रे गतः । तत्र कुत्रचित् पर्वतात् पतन्तः जलबिन्दवः शुष्कपर्णानाम् उपरि पतित्वा मधुरं सङ्गीतं जनयन्ति स्म । एतद् अवगत्य प्रेरितः सः तृषाकुलतां विस्मृत्य वेगेन आश्रमम् आगतवान् । सङ्गीतसाधनेषु प्रतिध्वनेः उत्पादनार्थं यः सूक्ष्मक्रमः आवश्यकः तम् अन्विष्टवान् सः । एवं यत् सङ्गीतसाधनं निर्मितवान् – तस्य नाम ‘मृदङ्ग’ इति ।

**प्रशनाः**

१. मुनिना कीदृशः शब्दः श्रुतः ?
२. मुनिः कया पीडितः आसीत्?
३. मुनिः किं विस्मृत्य वेगेन आश्रमम् आगतवान्?
४. सङ्गीतसाधनस्य नाम किं?
५. मुनिः किं अन्विष्टवान्?

******